# श्रीमन्महाभारत तात्पर्यनिर्णय भावसंग्रहः

योग्रेभूद्विश्वगर्भः सुखनिधिरमितैर्वासुदेवादिरूपैः ।
क्रीडन् देवैरजाद्यैरगणितसुगुणो नित्यनीचोच्चभावैः ।
वेदैर्वेद्योऽस्तदोषोऽप्यसुरजनमनो मोहयन् मर्त्यवृत्या ।
भक्तानां मुक्तिदाता द्विषदसुखकरः पातु सोऽस्मान् महेशः॥ १ ॥

Sarvashaastra Nirnaya

सद्ग्रंथानां समूहे जगति विलुलिते येन तद्भावमुच्चै-
र्वक्तुं मध्वो नियुक्तो व्यधित सुवचसामुद्धृतिं भारतस्य ।
देवोत्कृष्वस्य विष्णोः परमपुरुषतां तारतम्यं सुराणा
वायोर्जीवोत्तमत्वादिकमपि वदतां व्यासमीडे तमीशम् ॥ २ ॥

Harisarvottamatva & Vayujeevottamatva

आदौ रूपचतुष्टयीं सृजति यो देवान् पुरानुक्रमा-
द्ब्रह्मांडं पुरमब्जजादिविबुधान् सृष्ट्याहरत्यंततः ।
स्रष्टा पूर्ववदस्य सर्वजगतो मत्स्यादिरूपोऽभवद्-
रामोऽभूदनुजान्वितो दशरथात् पायात् स नः श्रीपतिः ॥ ३ ॥

Srusti stithi dashavatara niroopana

यद्बुद्धिर्जनमोहिनी मुदमिता यद्दर्शनात् सज्जना

येनार्थिप्रियकारिणा निशिचरीहंत्रा क्रतू रक्षितः ।
योऽहल्यां सपतिं व्यधाद्धरधनुर्भंक्त्वाऽवहज्जानकीं
जेता वर्त्मनि भार्गवस्य नगरीं रामो गतोऽव्यात् स माम् ॥ ४ ॥

Raamaayana Baalakaanda – Ahalya shaapa vimochana, Janaki Vivaaha, Parashurama samaagama, etc

त्यक्त्वा राज्य मितो वनं वचनतो मातुः सः काकाक्षिगं
दैत्यं व्यस्य विकर्णघोणखचरीबंधून् खरादीन् खलान् ।
मारीचं च निहत्य रावणहृतां सीतां विचिन्वन्निव ।
प्राप्तो वायुसुतेन सूर्यजयुजा रामोवताद्वंदितः ॥ ५ ॥

Kharadooshana samhaara, Maricha vruttanta, Seetaapaharana, SeetanvEshana, Hanumaddarshana.

सुग्रीवेण सखित्वमाप्य शपथं कृत्वा वधे वालिन–
स्तालान् सप्त विभिद्य वालिनिधनं कृत्वा स्वराज्ये स्थितम् ।
मार्तंडिं च विधाय मारुतियुजा याम्यां दिशं गच्चता
सीतान्वेषणमिच्चताब्धितरणे रामोऽवतात् संस्तुतः ॥ ६ ॥

Sugreeva Sakhya, Wali vadha, Sugreeva raajyabhisheka. Sugreeva ordered his Kapisainya to assist Hanumanta in searching Seetha.

यस्य श्री हनुमाननुग्रहबलात् तीर्णांबुधिर्लीलया
लंकां प्राप्य निशाम्य रामदयितां भंक्त्वा वनं राक्षसान् ।
आक्षादीन् विनिहत्य वीक्ष्य दशकं दग्ध्वापुरीं तां पुन–
स्तीर्णाब्धिः कपिभिर्युतो यमनमत् तं रामचंद्रं भजे ॥ ७ ॥

Sundarakanda Varnana – Hanuman flew to Lanka defeating all the obstacles on the way. Simhilee samhaara, samhaara of thousands of daithyaas, meeting Seetakruti in Ashokavana, Akshakumara samhara, Brahmastra prayoga by Indrajit, honour of Brahmastra by Hanuman, entering Ravanaas palace as a messenger and ordering Ravana to release Seetakruti, Ravana refused, and set fire on the tile of Hanuman, which burnt the majority portion of Lanka.

सिंधुं दक्षिणमागतो दशमुखभ्रातिष्टदोऽभ्यर्चितो
बध्वा सेतुमवाप्य राक्षसपुरीं सैन्यैः कपीनां युतः ।
हत्वेंद्रारिकरीरकर्णदशकादीन् राक्षसान् जानकी–
मादायाप्य पुरीं स्वराज्यपदवीं प्राप्तोऽवताद्राघवः ॥ ८ ।

Sethu bandana, Lanka pravesha alongwith the Kapi sainya, killing of Ravanaa- Kumbakarnaadi kotyaadi Rakshasaas, Yuddhakanda varnana - Ayodya pravesha, rajyabhisheka.

प्राप्तः साम्राज्यलक्ष्मीं प्रियतमभरतं यौवराज्येऽभिषिच्य
स्वीयान् रक्षन् सुतौ द्वौ जनकदुहितरिं प्राप्य यज्ञैयजन्स्वम् ।
सीताहेतोर्विमोह्य क्षितिजदितिसुतानर्थितो देवसंघैः
सद्भिर्युक्तो हनूमध्वरद उपगतः स्वं पदं पातु रामः ॥ ९ ॥

After Rajyabhisheka to Ramachandra, and Yuva Rajyabhisheka to Bharatha, Uttarakanda varnana

क्षीराब्ध्युन्मथनादिकात्मचरितं देवैर्गुणद्भिः स्तुतः
सज्ज्ञानाय पराशराख्यमुनिना यः सत्यावत्यामभूत् ।
व्यासत्वेन विधाय वेदविवृतिं शास्त्राणि सर्वाण्यपि
ज्ञानं सत्सुविधाय सद्गतकलिं निघ्नन् स नोऽव्याद्धरिः ॥ १० ॥

When all the devaas did the stavana, Srihari born as the son of Parashara-Satyavati in the name Vedavyaasa - varnana – Veda vibhaga – Shaastra – Purana Kathana by Vedavyasaru.

भूपा यत्र पुरूरवप्रभृतयो जाता विधोरन्वयः
यद्वाद्या भरतादयः कुरुमुखा भीष्मांबिकेयादयः ।
भूभारक्षयकांक्षिभिः सुरवरैरभ्यर्थितः श्रीपति–
स्तत्राविर्भवितुं सह सुरवरैरिच्छन् हरिः पातु माम् ॥ ११ ॥

Puroorava, bharataadadi, kuruvamsha kathama, bheeshma – ambike prakarana, devataa prarthana for bhoobhara harana, Krishnavatara peetika.

देवक्यां वसुदेवतोऽग्रजयुतो जातो व्रजं यो गतो
बालघ्नीशकटाक्षहा स्वजननीमान्यसृणावर्तहा ।
यत्पूर्वं भरतश्च पांडुतनया यत्सेवनं जज्ञिरे
कर्तुं धर्ममरुद्वृषाश्विभिरजं नंदात्मजं नौमि तम् ॥ १२ ॥

Birth of Krishna through Vasudeva-Devaki, Krishna’s baala leela, pootana samhara, Shakatasura- truneekruta-trunaavarta samhaara, Janana of Drutarashtra – Pandu, Janana of Dharmaraajadees, etc.

संस्कारान् प्राप्य गर्गाद्बहुशिशुचरितैः प्रीणयन् गोपगोपी–
र्वत्सान् धेनूंश्च रक्षन्नहिपतिदमनो यः पपौ काननाग्निम् ।
विप्रस्त्रीप्रीतिकारी धृतधरणिभरो गोपिकाभिर्निशासु
क्रीडन् मल्लांश्चकंसं न्यहनदुपगतोऽव्यात्सकृष्णः पुरीं स्वाम्॥१३॥

Gurukula vaasa by Krishna, Gopika Kreedana, Dhenukaasura bhanjana, Eating of Viprastree bhojana alongwith his friends, Chanoora Mustikasura samhara, Kamsapuree gamana, kamsa vadha.

पित्रोर्बंधं निरस्य क्षितिपतिमकरोदुग्रसेनं गुरोर्यः
पुत्रं प्रादात् परेतं युधि जितजरासंधपूर्वारिवर्गः ।
पार्थान् पित्रा विहीनानुपगतनगरान् यस्वजोपाद्विपद्भ्यो
नंदादीनुद्धवोक्त्या गतविरहशुचः कारयन् सोऽवतान्माम् ॥१४॥

Krishna gave back the kingdom to Ugrasena from Kamsa, Guruputra samrakshana, Panchajana samhara, panchajanya shanka dharane, Jarasandhaadi daithya nigraha, etc.

यस्माद्व्यासस्वरूपदपि विदितसुविद्या आप्नुयुश्च प्रमोदं
पार्था द्रोणः सुतार्थं प्रतिगतभृगुपो यन्नियत्याऽर्थकामः ।
तस्मादाप्तोरुविद्यो द्रुपदमुपगतोऽनाप्तकामोऽस्त्रविद्यां
शिष्येभ्यः कौरवेभ्यो दितिजनिरसनो दात् स नोऽव्यान्मुरारिः॥१५॥

Pandava – Kauravaas Yudhaabhyasa from Dronacharya – entry to Drupadaraja palace

भूयस्त्वागतमाहवे सह जरासंधं नृपैर्नीतये
ज्ञात्वागात् सहजान्वितोऽतिगहनं गोमंतमत्रागतान् ।
ताक्ष्याल्लब्धकिरीट उन्नतगिरेराप्लुत्य जित्वा रिपून्
हत्वा स्वीयसृगालमात्मनगरीं प्राप्तः सनोऽव्याद्धरिः ॥ १६ ॥

Srugala vasudeva samhara, defeating all the daithyaas

भग्नाशान् नृपतीनरीन् व्यधित यः स्वर्गाधिपाग्र्यासने
लग्नो भीष्मकसत्कृतोऽथ यवनं जघ्ने सतीमात्मनः ।
निघ्नां यो कृत रुग्मिणीं समजयद्दुर्गर्विरुग्म्यादिकान्
विघ्नं सत्राजितात्मजापतिरसौ मे घन् भवेत् सर्वदा ॥ १७ ॥

Defeating Rugmyaadi daityas, Rukmini swayamvara, Satyabhama Vivaha, Hamsa dimbika vadha.

अस्त्रज्ञेष्वधिकोऽर्जुनो थ यदनुक्रोशेन भीमं विना
सद्धर्मेनिरतं ददौ स्वगुरवे बध्वा नृपं पार्षतम् ।
पुत्रौ स द्रुपदो पि वह्निविबुधस्त्रीरूपकौ प्राप्तवान्
इष्टां धर्मज आप राज्यपदवीं स प्रीयतां मे हरिः ॥ १८ ॥

Digvijaya of Bheemarjuna, Draupadi jana in Agni, Drustadyumna janana,

यत्कारुण्यबलेन पांडुतनया निस्तीर्ण नानापदो
भिक्षान्नाशिन आगमाभ्यसनिनो हत्वाबकं द्रौपदीम् ।
उद्वाह्याखिलभूपतीनपि ततो जित्वा गताः स्वां पुरी–
मिंद्रप्रस्थपुरेऽवसन् कृतधरारक्षाः स नोऽव्याद्धरिः ॥ १९ ॥

Yudhistira Raajya padavi at Indraprstha. Raajya paalana.

यः पार्थान् परिपालयन् हरिपुरे स्त्री पुत्रसंपद्युतान्
संहर्ता शतधन्वनोष्टमहिषीर्भर्ता सुरर्षिस्तुतः ।
हत्वा भौममपाहरत् सुरतरुं बह्वीरुवाहांगनाः
प्रायच्छ्वद्धरिसूनवे स्वसहजां पायात् स नः केशवः ॥ २० ॥

Shatadhanva samhara, Astamahishi vivaaha by Krishna, Khandavadahana.

पार्थान् लब्धसभान् विधाय मयतः प्राप्तः परं स्वं गतः
क्षेत्रं कौरवमर्कपर्वणि पुरीं संप्राप्य कर्ता क्रतोः ।
पांडून् प्राप्य जरासुते विनिहते तैः कारयित्वाऽध्वरं
प्राप्तः स्वं पुरमच्युतो विजयते द्यूते जितैश्च स्मृतः ॥ २१ ॥

Jarasandha Samhara, Defeat of Dharmaraja by Duryodhana through Dyoota, raajya haani for paandavaas, entry to forest

पार्था यता अरण्यं निहतनिशिचराः प्रीणयंतो द्विजौघान्
वार्तां श्रुत्वा स्वकीयामुपगतहरिणा मानिताः सिंधुराजम् ।
जित्वा दुर्योधनादीन् हरिहयपुरुषव्रातबद्धान् विमोच्य
प्राप्ता धर्मात् प्रसादं यमथ मुररिपुं तुष्ठवुस्तं प्रपद्ये ॥ २२ ॥

Even in the forest during Vanavaasa, freed Duryodana from his enemies - as per the orders of Dharmaraja – when Duryodana was caught.

अन्यं वेषमुपागता पृथगतो गत्वा विराटालयं
तद्देहस्थहरेर्निषेवणपरा मल्लं तथा कीचकान् ।
हत्वा गोग्रहणोद्यतानपि कुरून् जित्वा विराटार्चिताः
पार्थाः स्वांतिकमागतं यमजितं भेजुस्तमीडेऽच्युतम् ॥ २३ ॥

Virata Parva – Virata Raja nagara gamana, killing of Keechaka, Gograhana, entire Kauravas were defeated by Arjuna in the form of Bruhannale

यस्तंमत्या पृषततनुजप्रेषितं ब्राह्मणोक्त्या
राज्यं नादादनुजजनितस्यांबिकेयोऽर्जुनस्य ।
यः साहाय्यं व्यधित नगरीं कौरवाणामवाप्तः
स्वोक्तैकृष्णस्तदनभिमतेराप्तपार्थः स नोऽव्यात् ॥ २४ ॥

After 12 years Vanavaasa and 1 year ajnaatha vaasa – entry of Pandavaas back to Hastinapura, refuse of Kingdom to Paandavaas – Krishna sandhana failure – Declare of War between the Pandavaas – Kauravaas.

सेनां वीक्ष्य रणोन्मुखे करुणया शस्त्रोज्जितं फल्घुणं
सद्गीतामुपदिश्य कार्मुकधरं चक्रेऽस्य यः सारथिः ।

अन्योन्यं कुरुपांडवैश्च पृतनां योऽजीघनत् स्यंदना-
द्यो भीष्मं निरपातयत् सुतशरैः पांडोस्तमीडेच्युतम् ॥ २५ ॥

After seeing the entire sena, Arjuna refusing to fight against his own cousins, gurus, and elders, Bhagavadgeeta upadesha by Sri Krishna – Bheeshma falling in Sharapanjara.

द्रोणे युध्यति पांडवैर्विनिहतं प्रग्जोतिषं पार्थतः
कृत्वा तस्य सुते हते निशि शिवं नीत्वार्जुनं सैंधवम् ।
तद्धत्तास्त्रबलादजीघनदतो द्रोणे हते द्रौपदे-
र्यो भीमं च निजास्त्रनम्रमकरोत् तं नौमि नारायणम् ॥ २६ ॥

Abhimanyu samhaara by Kauravaas, Saindhava samhara by Arjuna, Narayanastra shaman.

यत्सामर्थ्यबलेन सूर्यतनुजे पार्थेन युद्धे जिते ।
पश्चाच्चल्यमवाप्य सारथिवरं धर्मात्मजं सायकैः ।
शीर्णांगं कृतवत्यमुं शिबिरगं पार्थं च मृत्योरपा-
द्यः पार्थेन हतेऽर्कजे नृपनुतः पायात् स नः केशवः ॥ २७ ॥

Surya putra Karna samhara

शल्ये धर्मसुताद्धते कुरुबले पार्थैः समस्ते हते
भीमेनानुजसंयुते विनिहते दुर्योधने द्रौणिना ।
सुप्तानां निधने कृते निशि ततो मुक्ता विधेरस्त्रतः
पार्थान् राज्यमितांश्च तत्सुतसुतं यो पात् स नोऽव्याद्धरिः ॥२८॥

Defeat of entire Kaurava sainya, Killing of Upapaandavaas by Ashwathama, Pandava Rajya prapthi.

कृष्णाभ्यामपि भूसुरैर्नृपसुते राज्येभिषिक्तो द्विजै–
र्दग्धे निंदति भिक्षुके खलतरे स्वं विप्रतीसारतः ।
राज्यं त्यक्तुमथोद्यतो वचनतो यस्याप्तभीष्मस्ततः
शुश्रावाखिलधर्मनिर्णयमदः कृष्णद्वयं धीमहि ॥ २९ ॥

Dharmasaara nirupana by Bheeshmacharya in front of Srikrishna, Vasista Krishna & Yadava Krishna giving dharma upadesha.

स्मृत्वायं द्युसरित्सुतो वसुरभूद्राज्यं यदाश्वासितो
निर्दुःखोऽथ जुगोप धर्मनिरतो जित्वा स्वराज्यं कलिम् ।
यः पार्थं समबोधयन्मृतशिशुं यो जीवयत् पांडवै–
र्यो यज्ञं समकारयुद्धहुधनैर्ध्यायामि तं केशवम् ॥ ३० ॥

Dharmaraja doing Ashwamedha Yaaga – Kali Nigraha

यद्युक्ताः पांडुपुत्राः क्षितमथ जगुपुर्धर्मराजस्त्वरावान्
धर्मे यत्प्रीतयेऽभूत् पवनजवचनैरांबिकेयं विरक्तम् ।
व्यासात्मा यो वनस्थं त्वकृत निजमनोऽभीष्ठवंतं गतं स्वं
नाथं पार्थाः स्मरंतो मुमुदुरपि पदं यस्य कृष्णं तमीडे ॥ ३१ ॥

Dharmarajya stapane by Panduputraas

यो यष्ठा विप्रशापाद्यदुकुलमवधीदर्थितोऽगात् स्वलोकं
देवैर्भैष्म्याद्युपेतो यदनु निजपदं पांडवा अप्यवापुः ।
दैत्यायद्वेषतोंधे तमसि निपतिता बुद्धरूपोभवद्यः
कल्क्यात्मांऽते कलेर्यः कुजननिधनकृत् पातु सोऽस्मान् सुरेशः॥३२॥

Yadukula naasha through Vipra shaapa, Krishna swaloka gamana, Pandavaas' swaloka gamana, Buddha roopa varnana, kalki roopa varnana.

महाभारततात्पर्यनिर्णयाशयसंग्रहः
राघवेंद्रेण यतिन कृतः सज्जनसंविधे ॥ ३३ ॥

॥ इति श्री राघवेंद्रतीर्थकृतः महाभारतात्पर्य निर्णयभावसंग्रहः ॥

Mahabharatha Tatparya Nirnaya Bhavasangraha

Srimadacharyaru has written Mahabharatha Tatparya Nirnaya with 32 adhyaayaas. Sri Raghavendra Tirtharu has written Bhavasangraha with 32 stanzaas.

The 32 adhyaayas contains :-

1. Sarvashaastra Nirnaya
2. Harisarvottamatva & Vayujeevottamatva
3. Srusti stithi dashavatara niroopana
4. Raamaayana Baalakaanda – Ahalya shaapa vimochana, Janaki Vivaaha, Parashurama samaagama, etc
5. Kharadooshana samhaara, Maricha vruttanta, Seetaapaharana, SeetanvEshana, Hanumaddarshana.
6. Sugreeva Sakhya, Wali vadha, Sugreeva raajyabhisheka. Sugreeva ordered his Kapisainya to assist Hanumanta in searching Seetha.
7. Sundarakanda Varnana – Hanuman flew to Lanka defeating all the obstacles on the way. Simhilee samhaara, samhaara of thousands of daithyaas, meeting Seetakruti in Ashokavana, Akshakumara samhara, Brahmastra prayoga by Indrajit, honour of Brahmastra by Hanuman, entering Ravanaas palace as a messenger and

ordering Ravana to release Seetakruti, Ravana refused, and set fire on the tile of Hanuman, which burnt the majority portion of Lanka.

8. Sethu bandana, Lanka pravesha alongwith the Kapi sainya, killing of Ravanaa- Kumbakarnaadi kotyaadi Rakshasaas, Yuddhakanda varnana - Ayodya pravesha, rajyabhisheka.
9. After Rajyabhisheka to Ramachandra, and Yuva Rajyabhisheka to Bharatha, Uttarakanda varnana
10. When all the devaas did the stavana, Srihari born as the son of Parashara-Satyavati in the name Vedavyaasa - varnana – Veda vibhaga – Shaastra – Purana Kathana by Vedavyasaru.
11. Puroorava, bharataadadi, kuruvamsha kathama, bheeshma – ambike prakarana, devataa prarthana for bhoobhara harana, Krishnavatara peetika.
12. Birth of Krishna through Vasudeva-Devaki, Krishna's baala leela, pootana samhara, Shakatasura- truneekruta-trunaavarta samhaara, Janana of Drutarashtra – Pandu, Janana of Dharmaraajadees, etc.
13. Gurukula vasa by Krishna, Gopika Kreedana, Dhenukaasura bhanjana, Eating of Viprastree bhojana alongwith his friends, Chanoora Mustikasura samhara, Kamsapuree gamana, kamsa vadha.
14. Krishna gave back the kingdom to Ugrasena from Kamsa, Guruputra samrakshana, Panchajana samhara,

panchajanya shanka dharane, Jarasandhaadi daithya nigraha, etc.

15. Pandava – Kauravaas Yudhaabhyasa from Dronacharya – entry to Drupadaraja palace.
16. Srugala vasudeva samhara, defeating all the daithyaas
17. Defeating Rugmyaadi daityas, Rukmini swayamvara, Satyabhama Vivaha, Hamsa dimbika vadha.
18. Digvijaya of Bheemarjuna, Draupadi jana in Agni, Drustadyumna janana,
19. Yudhistira Raajya padavi at Indraprstha. Raajya paalana.
20. Shatadhanva samhara, Astamahishi vivaaha by Krishna, Khandavadahana.
21. Jarasandha Samhara, Defeat of Dharmaraja by Duryodhana through Dyoota, raajya haani for paandavaas, entry to forest
22. Even in the forest during Vanavaasa, freed Duryodana from his enemies - as per the orders of Dharmaraja – when Duryodana was caught.
23. Virata Parva – Virata Raja nagara gamana, killing of Keechaka, Gograhana, entire Kauravas were defeated by Arjuna in the form of Bruhannale.
24. After 12 years Vanavaasa and 1 year ajnaatha vaasa – entry of Pandavaas back to Hastinapura, refuse of

Kingdom to Paandavaas – Krishna sandhana failure – Declare of War between the Pandavaas – Kauravaas.

25. After seeing the entire sena, Arjuna refusing to fight against his own cousins, gurus, and elders, Bhagavadgeeta upadesha by Sri Krishna – Bheeshma falling in Sharapanjara.
26. Abhimanyu samhaara by Kauravaas, Saindhava samhara by Arjuna, Narayanastra shaman.
27. Surya putra Karna samhara
28. Defeat of entire Kaurava sainya, Killing of Upapaandavaas by Ashwathama, Pandava Rajya prapthi.
29. Dharmasaara nirupana by Bheeshmacharya in front of Srikrishna, Vasista Krishna & Yadava Krishna giving dharma upadesha.
30. Dharmaraja doing Ashwamedha Yaaga – Kali Nigraha
31. Dharmarajya stapane by Panduputraas
32. Yadukula naasha through Vipra shaapa, Krishna swaloka gamana, Pandavaas' swaloka gamana, Buddha roopa varnana, kalki roopa varnana.

This is just the brief description of Mahabharatha Tatparya Nirnaya by Rayaru.